# मम पुस्तकम्

नाम - ______________________

पत्र-सङ्केतः - ______________________

______________________

चल-दूरवाणी-सङ्ख्या - ______________________


नवदेहली NEW DELHI
नवदेहली
NEW DELHI

## वार्तालापाय

१. एतत् चित्रं कस्य रेलस्थानकस्य अस्ति ?

२. स्थगनपीठे (प्लेटफार्म) किं रेलयानम् अस्ति । ?

३. भवतः/भवत्याः गृहात् सर्वाधिकं समीपं किं रेलस्थानकम् अस्ति ? ४. भवतः ग्रामात् अथवा नगरात् ग्वालियर-पर्यन्तं कथं प्राप्तुं शक्नुमः ।



# १० यात्रा

### वयं ज्ञास्यामः

- समयमापनस्य उपयोगः कथं करणीयः (१२ एवं च २४ होरात्मिका घटिका)
- दिनदर्शिकायां, समय-सारिण्यां रेल-चिटिकायां च दत्तानां सूचनानाम् अवगमनम्।

## अधः लिखितान् शब्दान् पठन्तु -

| | | | | |
|---|---|---|---|---|
| आसनम् | दृश्यम् | चालकः | शीटिका | मृन्मार्गः |
| प्रत्यागमनम् | रेलयानम् | मार्गः | प्रसाधनम् | यात्रा |
| राजमार्गः | वृषभशकटम् | भाटकम् | पाथेयम् | द्विचक्रिका |
| रेल-चिटिका | यात्री | प्रवासी | लोकयान-स्थानकम् | रेल-स्थानकम् |
| यात्रा-आरक्षणम् | त्रिचक्रिका | शयन-यानम् | रेलयान-प्रबन्धकः | कर्षण-यन्त्रम् |
| रेल-चिटिका | स्थगन-पीठम् | सञ्चालकः | भारवाहकः | तत्काल-आरक्षणम् |

**शिक्षकनिर्देशः** — उपरि यात्रासम्बद्धाः केचन शब्दाः दत्ताः सन्ति, तान् शब्दान् आश्रित्य परस्परं चर्चां कुर्वन्तु। पुनः कस्याश्चित् स्वयात्रायाः, वृत्तान्तं श्रावयितुं शिक्षकः सहभागिनः प्रेरयेत्। यात्रा-आधारितस्य कस्यचित् नाटकस्य मञ्चनाय अपि प्रोत्साहनं कुर्यात्।

# गान्धिनः आत्मकथायाः .....

“गिरमिट्-प्रथा” इत्यस्मिन् अध्याये गान्धि-महोदयः लिखति –

अहम् एकवारं रेलयाने जन-सम्मर्देन असहनीयां पीडाम् अनुभूतवान् । मया लाहौरमार्गेण कराचीनगरतः कलकत्तानगरं गन्तव्यम् आसीत् । लाहौरनगरे रेलयानस्य परिवर्तनम् अपेक्षितम् आसीत् । किन्तु तत्र जन-सम्मर्दस्य कारणात् महती अव्यवस्था आसीत् । यात्रिणः बलपूर्वकं रेलयानस्य अन्तः प्रविशन्ति स्म । यदि द्वारं पिहितम् अस्ति तर्हि यात्रिणः गवाक्षैः अन्तः गच्छन्ति स्म । कलकत्तानगरं गन्तुं तस्मिन् एव दिने अपेक्षितम् आसीत् । यदि इदं रेलयानं त्यक्तं स्यात् तर्हि मम कलकत्तानगरस्य प्राप्तिः असम्भवा आसीत् । रेलयानं प्रवेष्टुं मम आशा समाप्ता । कोऽपि मह्यम् अन्तः प्रवेष्टुं न दत्तवान् ।





अन्ततः एकः श्रमिकः माम् उक्तवान् – "यदि भवान् मह्यं पादोनरूप्यकं ददाति तर्हि अहं भवन्तम् अन्तः प्रवेशयामि ।" अहम् उक्तवान् – "भवान् मां रेलयानस्य अन्तः प्रवेशयतु । अहं भवतः कृते पादोन-रूप्यकाणि ददामि ।" श्रमिकः तत्र उपविष्टान् यात्रिणः आर्त्तभावेन प्रार्थितवान् । किन्तु कोऽपि रेलयानस्य अन्तः मम प्रवेशाय सज्जः न आसीत् । रेलयानस्य प्रस्थानस्य समयः जातः । शकटस्य केचन यात्रिणः उक्तवन्तः - "रेलशकटस्य अन्तः प्रवेष्टुं स्थलं न अस्ति । परन्तु अन्तः प्रवेष्टुं कश्चित् प्रयासं करोतु । तथापि भवान् उपवेष्टुं न शक्नोति ।" श्रमिकः मां पृष्टवान् – "किं भोः?" अहम् उक्तवान् -"आम्!" सः माम् गवाक्षात् अन्तः प्रवेशितवान् । अहम् अन्तः प्रविष्टवान् । सः श्रमिकः पादोनरूप्यकाणि च अर्जितवान् ।

एषा रात्रिः मम कृते बहु-कष्टदायिनी आसीत् । अन्ये यात्रिणः कथञ्चिद् उपविष्टवन्तः । अहं होराद्वयं यावत् उपरिस्थितस्य आसनस्य लौह-शृङ्खलां गृहीत्वा स्थितवान् । मध्ये मध्ये केचन यात्रिणः मां तर्जयन्ति स्म - "अरे भोः ! किमर्थं न उपविशति ?" अहं बहुधा उक्तवान् यत् कुत्रापि स्थलं न अस्ति । किन्तु अहं तिष्ठन् अस्मि इति ते सोढुं न शक्नुवन्ति स्म । ते वारंवारं मां पीडयन्ति स्म । यावत् ते मां पीडितवन्तः तावत् अहं शान्त्या उत्तरं दत्तवान् । तेन ते शान्ताः अभवन् । ते मम नाम स्थानं च पृष्टवन्तः । यदा अहं मम नाम उक्तवान्, तदा ते लज्जिताः जाताः । ते यात्रिणः क्षमायाचनां कृतवन्तः । स्वपार्श्वे उपवेशनार्थं स्थानम् अपि दत्तवन्तः । 'धैर्यस्य

मधुरं फलम्’ इति उक्तिम् अहं स्मृतवान्। अहं बहु-श्रान्तः आसम्। मम शिरोवेदना जायमाना आसीत्। यदा मम कृते आसनस्य अत्यधिका आवश्यकता आसीत् तदा ईश्वरः तस्य प्रबन्धनं कृतवान्।

## पठन्तु वार्तालापं च कुर्वन्तु –

**प्रश्नः१.** गान्धि-महोदयः रेल-यात्रायै रेल-स्थानकं प्राप्तवान्। सः रेल-स्थानकं यावत् यात्रां कथं कृतवान्?

**प्रश्नः२.** गान्धि-महोदयस्य युगे गमनागमनाय रेलयानम्, मोटर-यानम्, अश्वशकटम्, वृषभशकटम्, द्विचक्रिका इत्यादीनाम् अधिकः प्रयोगः दृश्यते स्म। भवान्/भवती आधुनिके युगे यात्रायै कानि नूतनानि साधनानि पश्यति?

**प्रश्नः३.** कस्याम् अपि यात्रायां पुरुषाणां सङ्ख्या अधिका वर्तते। स्त्रियः तु अल्पाः एव दृश्यन्ते। केन कारणेन?

**प्रश्नः४.** यथा गान्धि-महोदयः स्वयात्रां स्मृतवान्, किं भवन्तः काम् अपि स्वीयां यात्रां स्मरन्ति? तस्याः सन्दर्भे वदन्तु।

**प्रश्नः५.** अनेकेषु ग्रामेषु अद्यापि गमनागमनाय न्यूनं सौविध्यं वर्तते। तत्रत्यानां स्थानानां जनानां कृते कीदृश्यः समस्याः जायन्ते? भवन्तः स्वक्षेत्रस्य अनुभवम् आधृत्य वदन्तु।

भारतीय-राष्ट्रिय-कांग्रेसदलस्य आमन्त्रणे गान्धि-वर्यः १९१७ तमे वर्षे लाहौरनगरात् कलकत्तानगरपर्यन्तं यात्रां कृतवान्। सः तदापर्यन्तं 'महात्मा' इति उपाधिना विभूषितः न आसीत्। किन्तु मार्गे चलनसमये यदा जनाः तं पश्यन्ति स्म, तदा तस्य नाम्नः उद्घोषणं भवति स्म।

# यात्रा

अहं भगिनी-गृहम् आगतवान् । द्वित्राणि दिनानि अत्र भविष्यामि । अनन्तरं गृहं प्रति गमिष्यामि । भगिनी अपि यदा कदा आगच्छति किन्तु तस्याः आगमनं निरन्तरं न भवति । आवाम् एकस्मात् गृहात् एव यात्राम् आरब्धवन्तौ । भगिनी मम अपेक्षया त्रिभिः वर्षैः ज्येष्ठा अस्ति । सा मयि बहु स्निह्यति । सा यत् किमपि खादति स्म मह्यम् अपि किञ्चित् ददाति स्म । अहम् अपि यदा कदा तस्यै स्ववस्तूनि ददामि स्म । किन्तु मम वस्त्राणि तस्याः कृते लघूनि भवन्ति स्म । भगिन्याः वस्त्राणि मम कृते दीर्घाणि भवन्ति स्म । एकस्मिन् अवसरे अहं तस्याः निचोलं धृतवान् । मां दृष्ट्वा सा अत्यन्तं हसितवती । तस्याः हसनस्य कारणम् अहं न अवगतवान् किन्तु तस्याः हसनेन अहम् अपि हसितवान् ।



अद्य प्रातः आरभ्य अहं तस्याः एव गृहे अस्मि । प्रातः आरभ्य सा हसन्ती अस्ति । तस्याः बालानां पत्युः च सर्वाणि कार्याणि तां विना न भवन्ति । अहं तया सह एकान्ते एव मेलितुम् इच्छामि । किन्तु सा सर्वदा बालकैः आवृता भवति। अस्माकं प्राङ्गणे सा बीजपूरकस्य वृक्षं रोपितवती । अस्मिन् ऋतौ सः वृक्षः प्रथमवारं फलितः । तत् फलम् अहं तस्याः कृते आनीतवान् । किन्तु बालकानां समक्षं दास्यामि तर्हि ते हसेयुः । अथवा भगिनी स्वयं न खादित्वा बालेभ्यः दास्यति अथवा बालाः तस्याः हस्तात् स्वीकुर्युः । अद्य रात्रौ अहं लोकयानेन प्रति गच्छामि ।

लोकयाने सर्वे निद्रां कृतवन्तः । किन्तु चालकः जागरितः अस्ति, तेन सह अहम् अपि जागरितः अस्मि । मार्गे अनेके आपणाः सन्ति । शीतकालस्य रात्रिः आसीत् । केवलम् एकस्य आपणस्य समीपे अग्निः प्रज्वलति । अन्यत् सर्वं रिक्तम् अस्ति । द्वौ कुक्कुरौ तत्र सुप्तौ स्तः । यदा कदा अल्पः प्रकाशः दृश्यते । क्षेत्रे किञ्चित् दूरम् एकः गोलदीपः प्रकाशमानः अस्ति । अन्यत्र सर्वत्र अन्धकारः अस्ति। लोकयानस्य दीपस्य प्रकाशेन मार्गः अल्पः एव दृश्यते।

इयं कीदृशी यात्रा अस्ति । कोऽपि न जानाति वयं कुत्र गच्छामः । सर्वे चालके विश्वसन्ति । लोकयानात् बहिः अपि जनाः सुप्ताः सन्ति । प्रातःकाले अहं गृहं प्राप्स्यामि।

मम प्रतीक्षायां माता प्राङ्गणे उपविशति । भगिनी मात्रे पूगकर्तरीं दत्तवती । अहं तां स्यूतस्य उपरि स्थिते कोषे स्थापितवान् । झटिति एव तां पूगकर्तरीं मात्रे दत्तवान् । माता बहु सन्तुष्टा । अहं स्यूतात् बीजपूरकं बहिः निष्कासितवान् । अधुना अहं तां शाखाम् अन्विष्यामि यस्याः तत् फलं त्रोटितवान् ।

*— सुशील शुक्ल*

## पठन्तु वार्तालापं च कुर्वन्तु –

**प्रश्नः १.** लेखकः स्वभगिन्यै बीजपूरकं किमर्थं न दत्तवान् ?

**प्रश्नः २.** 'यात्रा' इति पाठस्य विषये स्व-अनुभवान् लिखन्तु ?

**प्रश्नः ३.** यात्राकाले लेखकः लोकयानात् बहिः किं किं दृष्ट्वान् ?

**प्रश्नः ४.** कदाचित् अल्पवयस्काः बालाः अपि स्वभगिन्याः वस्त्राणि धरन्ति इत्यस्मिन् विषये भवतां विचारान् लिखन्तु ?

**प्रश्नः ५.** अस्मिन् पाठे के के अंशाः भ्रातृभगिन्योः मध्ये स्नेहभावं प्रदर्शयन्ति ?

**प्रश्नः ६.** भवन्तः/भवत्यः कैः कारणैः यात्रां कृतवन्तः/कृतवत्यः ?

## पठन्तु योजयन्तु च –

| **खण्डः - क** | **खण्डः- ख** |
|---|---|
| क. अगच्छन् वैनतेयोऽपि | ङ. धर्मसाधनम् । |
| ख. उदारचरितानां तु | घ. न करोति शब्दम् । |
| ग. कर्मण्येवाधिकारस्ते | छ. बहुली भवन्ति । |
| घ. सम्पूर्णः कुम्भो | ञ. क्रमशः पूर्यते घटः । |
| ङ. शरीरमाद्यं खलु | ग. मा फलेषु कदाचन । |
| च. महाजनो येन गतः | क. पदमेकं न गच्छति । |
| छ. छिद्रेषु अनर्थाः | झ. यस्य तृष्णा विशाला |
| ज. सत्संगतिः कथय | ख. वसुधैव कुटुम्बकम् । |
| झ. सः तु दरिद्रः | च. सः पन्था । |
| ञ. जलबिन्दुनिपातेन | ज. किं न करोति पुंसाम् । |

**प्रश्नः ३.** भवतः/भवत्याः ग्रामे नगरे वा यात्रायाः कानि कानि साधनानि सन्ति ? अधोलिखितेषु साधनेषु गमनागमनाय भवान् / भवती केषां साधनानाम् उपयोगं करोति ? उपयुज्यमाने वस्तुनि (✓) इति चिह्नं योजयतु ।

| | | | | | |
|---|---|---|---|---|---|
| क) | लोकयानम् (बसयानम्) | | ङ) | बाईक / स्कूटर | |
| ख) | रेलयानम् | | च) | विद्युत्-त्रिचक्रिकायानम् (ई-रिक्शा) | |
| ग) | मेट्रोयानम् | | छ) | कारयानम् (टैक्सी) | |
| घ) | जीपयानम् | | ज) | भारवाहकयानम् (ट्रक) | |

**प्रश्नः ४.** भवान्/भवती स्वकीयायाः कस्याश्चित् स्मरणीय-यात्रायाः विशिष्ट-अनुभवान् अत्र लिखतु ।

_______________________________________________

_______________________________________________

_______________________________________________

_______________________________________________

_______________________________________________

_______________________________________________

_______________________________________________

_______________________________________________

प्रश्नः ५. कस्यै यात्रायै कीदृशी सज्जता करणीया ? स्वविचारान् अत्र लिखन्तु ।

# चतुर्विंशति-होरात्मिका घटिका

एकस्मिन् दिने चतुर्विंशतिः होराः भवन्ति। सामान्यतया वयं समयं द्रष्टुं १२ होरात्मिकायाः घटिकायाः प्रयोगं कुर्मः। अस्याः होरायाः सूचिका सम्पूर्णे दिवसे घटिकायाः चक्रद्वयं पूरयति। रात्रेः द्वादशवादनतः मध्याह्नस्य द्वादशवादन-पर्यन्तं समयः AM (प्रातः पूर्वाह्णः वा) एवं लेखनीयः। मध्याह्नस्य द्वादशवादनतः रात्रेः द्वादशवादनपर्यन्तं समयः PM (सायम् अपराह्णः वा) इति कथ्यते। चतुर्विंशति- होरात्मिकायां घटिकायां समयस्य दर्शनस्य विशिष्टः विधिः अस्ति। यथा - प्रातः ५ वादनस्य कृते ५:०० इति तथा च सायं इत्यस्य कृते १७:०० इति लिख्यते। एतादृशीनां घटिकानां प्रयोगः रेलयान-स्थानकेषु वायुयान-स्थानकेषु च भवति।

## समय-सारिणी

पीयूषः महाबोधि-एक्सप्रेस इत्यत्र उपविश्य देहलीतः प्रयागराजरेलयान-स्थानकपर्यन्तं यात्रां करिष्यति। अस्य रेलयानस्य समय-सारिणीं समयं चतुर्विंशति-होरात्मिकायाः घटिकायाः अनुसारेण प्रदर्शयति।

### १२३९८ महाबोधि एक्सप्रेस समय-सारिणी

| क्र. सं. | रेल-स्थानस्य नाम | प्राप्ति-समयः | प्रस्थानसमयः | दूरता (किलोमीटरपरिमिते) |
|---|---|---|---|---|
| १. | नवदेहली | ———— | १२:१० | ———— |
| २. | अलीगढ-यानम् | १३:५१ | १३:५३ | १३१ |
| ३. | कानपुर-सेन्ट्रलयानम् | १७:३० | १७:४० | ४४० |
| ४. | प्रयागराज-जंक्शनयानम् | २०:१० | २०:१५ | ६३५ |

## अधुना महाबोधि-एक्सप्रेस इति रेलयानस्य समय-सारिणीं दृष्ट्वा वदन्तु –

१. पीयूषः कदा प्रयागराजं प्राप्स्यति ? द्वादश-होरात्मिकायां घटिकायां तावति काले कः समयः भविष्यति ?

२. नवदेहलीतः प्रयागराज-रेलयान-स्थानकं प्राप्तुं कः समयः भविष्यति ?

३. नवदेहलीतः प्रयागराज-रेलयान-स्थानकं कियत् किलोमीटर-परिमितं दूरं वर्तते

४. अलीगढ-रेलयान-स्थानकात् प्रयागराजः कियत् दूरं वर्तते ?

**शिक्षक-निर्देशः** — शिक्षकः चतुर्विंशति-होरात्मिकायां घटिकायाम् अथवा द्वादश-होरात्मिकायां घटिकायां समयं द्रष्टुं सहभागिनः प्रेरयेत् । चतुर्विंशति-होरात्मिकायां घटिकायां समयं दृष्ट्वा द्वादश-होरात्मिकायां परिवर्तनं कथं करणीयम् इति पाठयेत् । रेलयानसारणीम् आश्रित्य सहभागिनः कृते अभ्यासाय अवसरं कल्पयेत् ।

## रेलचिटिका

अत्र पीयूषस्य रेल-चिटिका उदाहरणरूपेण प्रदत्ता अस्ति –



१. पीयूषस्य रेलयानस्य नाम किम् अस्ति ?

२. पीयूषस्य रेलयानस्य सङ्ख्या का अस्ति ?

३. रेलयानस्य शकटस्य (रेलयानकोच) सङ्ख्या का अस्ति ?

४. पीयूषस्य आसनस्य सङ्ख्या का ?

५. पीयूषस्य आयुः कियत् अस्ति ?

६. नव-देहलीतः प्रयागराज-पर्यन्तं रेलचिटिकायाः शुल्कं किम् अस्ति ?

७. यदि सः चिटिकां क्रेतुं पञ्चशतं रूप्यकाणि यच्छति तर्हि सः पुनः कति रूप्यकाणि प्राप्स्यति ?




दत्त्वा चिटिकायाः क्रयणे कियत् अवशिष्टम्

____________________




दत्त्वा चिटिकायाः क्रयणे कियत् अवशिष्टम्

____________________

## ■ रेलयानस्य चिटिकायां प्रदत्ताः सूचनाः पठित्वा वदन्तु लिखन्तु च -




- कुत्र पर्यन्तं यात्रा भविष्यति ? __________
- यात्रायाः तिथिः का अस्ति ? __________
- यात्रायां कियान् व्ययः भवति ? __________
- चत्वारः यात्रिणः भवन्ति तर्हि यात्रा-व्ययः कियान् भविष्यति ?

  __________
- यात्रापत्रस्य यात्रिकनाम-सञ्चयसङ्ख्या (PNR Numbers) का अस्ति ?

  __________

# दिनदर्शिका

## २०२४

### जनवरीमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| | १ | २ | ३ | ४ | ५ | ६ |
| ७ | ८ | ९ | १० | ११ | १२ | १३ |
| १४ | १५ | १६ | १७ | १८ | १९ | २० |
| २१ | २२ | २३ | २४ | २५ | २६ | २७ |
| २८ | २९ | ३० | ३१ | | | |

### फरवरीमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| | | | | १ | २ | ३ |
| ४ | ५ | ६ | ७ | ८ | ९ | १० |
| ११ | १२ | १३ | १४ | १५ | १६ | १७ |
| १८ | १९ | २० | २१ | २२ | २३ | २४ |
| २५ | २६ | २७ | २८ | २९ | | |

### मार्चमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| | | | | | १ | २ |
| ३ | ४ | ५ | ६ | ७ | ८ | ९ |
| १० | ११ | १२ | १३ | १४ | १५ | १६ |
| १७ | १८ | १९ | २० | २१ | २२ | २३ |
| २४ | २५ | २६ | २७ | २८ | २९ | ३० |
| ३१ | | | | | | |

### अप्रैलमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| | १ | २ | ३ | ४ | ५ | ६ |
| ७ | ८ | ९ | १० | ११ | १२ | १३ |
| १४ | १५ | १६ | १७ | १८ | १९ | २० |
| २१ | २२ | २३ | २४ | २५ | २६ | २७ |
| २८ | २९ | ३० | | | | |

### मईमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| | | | १ | २ | ३ | ४ |
| ५ | ६ | ७ | ८ | ९ | १० | ११ |
| १२ | १३ | १४ | १५ | १६ | १७ | १८ |
| १९ | २० | २१ | २२ | २३ | २४ | २५ |
| २६ | २७ | २८ | २९ | ३० | ३१ | |

### जूनमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| | | | | | | १ |
| २ | ३ | ४ | ५ | ६ | ७ | ८ |
| ९ | १० | ११ | १२ | १३ | १४ | १५ |
| १६ | १७ | १८ | १९ | २० | २१ | २२ |
| २३ | २४ | २५ | २६ | २७ | २८ | २९ |
| ३० | | | | | | |

### जुलाई-मासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| | १ | २ | ३ | ४ | ५ | ६ |
| ७ | ८ | ९ | १० | ११ | १२ | १३ |
| १४ | १५ | १६ | १७ | १८ | १९ | २० |
| २१ | २२ | २३ | २४ | २५ | २६ | २७ |
| २८ | २९ | ३० | ३१ | | | |

### अगस्तमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| | | | | १ | २ | ३ |
| ४ | ५ | ६ | ७ | ८ | ९ | १० |
| ११ | १२ | १३ | १४ | १५ | १६ | १७ |
| १८ | १९ | २० | २१ | २२ | २३ | २४ |
| २५ | २६ | २७ | २८ | २९ | ३० | ३१ |

### सितम्बरमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ |
| ८ | ९ | १० | ११ | १२ | १३ | १४ |
| १५ | १६ | १७ | १८ | १९ | २० | २१ |
| २२ | २३ | २४ | २५ | २६ | २७ | २८ |
| २९ | ३० | | | | | |

### अक्टूबरमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| | | १ | २ | ३ | ४ | ५ |
| ६ | ७ | ८ | ९ | १० | ११ | १२ |
| १३ | १४ | १५ | १६ | १७ | १८ | १९ |
| २० | २१ | २२ | २३ | २४ | २५ | २६ |
| २७ | २८ | २९ | ३० | ३१ | | |

### नवम्बरमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| | | | | | १ | २ |
| ३ | ४ | ५ | ६ | ७ | ८ | ९ |
| १० | ११ | १२ | १३ | १४ | १५ | १६ |
| १७ | १८ | १९ | २० | २१ | २२ | २३ |
| २४ | २५ | २६ | २७ | २८ | २९ | ३० |

### दिसम्बरमासः

| रवि. | सोम. | मंगल. | बुध. | गुरु. | शुक्र. | शनि. |
|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ |
| ८ | ९ | १० | ११ | १२ | १३ | १४ |
| १५ | १६ | १७ | १८ | १९ | २० | २१ |
| २२ | २३ | २४ | २५ | २६ | २७ | २८ |
| २९ | ३० | ३१ | | | | |

एकस्मिन् वर्षे १२ मासाः भवन्ति । केचन मासाः ३० दिनात्मकाः भवन्ति, केचन ३१ दिनात्मकाः भवन्ति । फरवरीमासः २८ अथवा २९ दिनात्मकः भवेत् । वर्षस्य प्रारम्भिकमासः जनवरीमासः एवं च अन्तिममासः दिसम्बरः अस्ति ।

यत् वर्षं चतुर्-संख्यया विभाजने सति ० अवशिष्टं भवेत्, तदा तस्य वर्षस्य फरवरीमासः २९ दिनात्मकः भवति । यथा – २०१६ एवं च २०२० इत्यत्र फरवरीमासः २९ दिनात्मकः आसीत् । २०२४ एवं च २०२८ इत्यत्र फरवरीमासः २९ दिनात्मकः भविष्यति ।

एकस्मिन् वर्षे ३६५ दिनानि भवन्ति । यस्मिन् वर्षे फरवरीमासः २९ दिनात्मकः भवति । तस्मिन् वर्षे ३६६ दिनानि भवन्ति ।

वयं सर्वे जानीमः यत् सप्ताहे ७ दिनानि भवन्ति । दिनदर्शिकायां प्रथमः रविवासरः एवं च अन्तिमः शनिवासरः अस्ति । दिनदर्शिकायां प्रत्येकं मासस्य गणना भवति । यथा – मासे कति सप्ताहाः भवन्ति ? कस्मिन् दिने कः दिनाङ्कः भविष्यति ? इत्यादयः

## अधः प्रदत्तां जनवरीमासस्य दिनदर्शिकां पूरयन्तु -

| रविवासरः | सोमवासरः | मंगलवासरः | बुधवासरः | गुरुवासरः | शुक्रवासरः | शनिवासरः |
|---|---|---|---|---|---|---|
| | १ | २ | ३ | | | ६ |
| | | | १० | | | |
| | १५ | | | | | २० |
| २१ | | | | २५ | | |
| | | | ३१ | | | |

## दिनदर्शिकां दृष्ट्वा वदन्तु -

- अस्मिन् मासे कति रविवासराः भविष्यन्ति ? ____________
- १९ दिनाङ्के कः वासरः भविष्यति ? ____________
- मासस्य चतुर्थे शनिवासरे कः दिनाङ्कः भविष्यति ? ____________
- किं १९ दिनाङ्के सोमवासरः भविष्यति ? ____________
- यदि पीयूषः ६ दिनाङ्के यात्रां प्रारभ्य १५ दिनाङ्के यात्रां समापयति तर्हि तेन कतीनां दिनानां यात्रा कृता ? ____________
- भवान्/भवती कथं ज्ञातवान्/ज्ञातवती ? ____________
- एषः मासः कस्मिन् दिनाङ्के समाप्यते ? ____________
- राधा शुक्रवासरस्य अवकाशं प्राप्नोति किं राधा अस्मिन् मासे ५ दिनानाम् अवकाशं प्राप्स्यति ? ____________

**शिक्षकनिर्देशः** — दिनदर्शिकायाः साहाय्येन द्वयोः दिनाङ्कयोः अथवा त्रयाणां दिनाङ्कानां मध्ये कति दिनानि भवन्ति इति। शिक्षकः सहभागिनः गणयितुं प्रेरयेत्।

# वर्णमाला

## स्वरवर्णाः

अ आ इ ई उ ऊ ऋ ॠ ऌ

ए ऐ ओ औ

अं अनुस्वारः अः विसर्गः

## व्यञ्जनवर्णाः

| | | | | | |
|---|---|---|---|---|---|
| क | ख | ग | घ | ङ | स्पर्श-वर्णाः |
| च | छ | ज | झ | ञ | |
| ट | ठ | ड | ढ | ण | |
| त | थ | द | ध | न | |
| प | फ | ब | भ | म | |
| य | व | र | ल | | → अन्तःस्थ-वर्णाः |
| श | ष | स | ह | | → ऊष्म-वर्णाः |

## संयुक्तवर्णाः

क्ष त्र ज्ञ श्र द्य